# संस्कृतवार्ताः

दिनाङ्क :- 16.01.2026

प्रात: - 06:55

<u>प्रधानमन्त्री/ स्टार्टअप इण्डिया</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्या: 'भारत-मण्डपमं' इति स्थले 'स्टार्टअप इण्डिया' इत्येतस्य दशवर्षाणि पूरण-उपलक्ष्ये समायोज्यमाने कार्यक्रमे भागं गृह्णीयात्। कार्यक्रमान्तर्गतं प्रधानमन्त्री नरेन्द्रमोदी जीवन्त-स्टार्टअप-इत्येतस्य सदस्यै: सह सम्वादमपि कुर्यात्। चयनिता: स्टार्टअप-प्रितिनिधय: स्वीय-उद्यमशीलता-परान् अनुभवान् प्रधानमन्त्रिणा मोदिना साकं विनिमयीकुर्यासु:। स्टार्ट-अप-इण्डिया-इत्येष: कार्यक्रम: प्रधानमन्त्रिणा मोरिना नवाचार-निवेशाधरिता-विकासरूपे परिवर्तन पर: राष्ट्रियकार्यक्रम: परिवर्तित: इति।

<u>प्रधानमन्त्री रेलयाना</u>

प्रधानमन्त्री नरेन्द्र मोदी श्व: पश्चिमबंगालस्य हावड़ा-असमयो: कायाख्या-सम्बद्धानि नवनिर्मितानि नैकानि रेलयानानि हरितपताकाप्रदर्शन-पुरस्सरं प्रस्थास्यति। एतै: रेलयानै: पश्चिमबंगाल-असम-बिहार-ओडिशा-आन्ध्रप्रदेश-कर्णाटक-तमिलनाडु-महाराष्ट्र-उत्तरप्रदेश-मध्यप्रदेश-सम्बद्धे रेलयान सम्पर्के तीव्रतम: परिकारो दृश्येत्। अथ एत: असमप्रदेशस्य कामरूप-महानगरपालिका-बोंगाईगांव-इत्येतेषु जनपदेषु अथ पश्चिमबंगालस्य कूचबिहार-

जलपाईगुडी-मालदा-मुर्शिदाबाद-पूर्वीवर्धमान-हुगली-हावड़ा-जनपदेषु वाणिज्य-पर्यटन-सामाजिकार्थिकविकासे च तीव्रतमं वर्द्धनं भविष्यन्ति।

<u>सैन्यदिवस:</u>

गतदिने जयपुर-नगरे सैन्यदिवसावसरे अष्टसप्ततितय: भव्य-पथसञ्चलन-कार्यक्रम: समायोजित:। एतस्मिन् भव्यकार्यक्रमे भारतीय सैन्यबलानां शौर्य-साहस-सैन्यक्षमता-पुरस्सरं भव्यप्रदर्शन दरीदृष्टम्। एतदवसरे सैयाध्यक्ष: जनरल-उपेन्द्रद्विवेदी वार्ताहरै: साकं वार्तावसरे प्रोक्तवान् यत् भारतीय-वीरभटानां सर्वोच्च-बलिदानं भारतीयसैन्यबलानां शौर्यपराक्रमश्च अद्भूत:। हुतिंगतेभ्य: वीरभटानां परिवारेभ्य: सम्मानरूपे सम्मानपदकानि अत्रप्रदस्तानि।

<u>वैश्विक-अर्थव्यवस्था</u>

भारतं वैश्विक-अर्थव्यवस्थाया: प्रमुखं भागम्। अन्ताराष्ट्रिय-मुद्राकोष-कार्यालयेन संसूचितम् यत् तृतीय-त्रैमासिक-परिणामे भारतस्य आर्थिकी वृद्धि: आशात: अधिका सुदृढ़ीजाता। सम्वाददातृसम्मेलने वार्ताहरान् सम्बोधयन् अन्ताराष्ट्रियमुद्राकोषस्य संचार-विभागस्य निदेशिका 'जूलीकोजैक' इत्येषा प्रोक्तवती यत् भारतस्य वृद्धि: सुदृढ़ीभूता, एतस्या: वृद्धि: मूलं भारतस्य आन्तरिका स्थिति:।

<u>भारत-इजराइल</u>

भारत-इजराइल-देशयो: मध्ये संयुक्त-मन्त्रिस्तरीय-अनुबन्धेषु हस्ताक्षराणि जातानि। मत्स्यपालन-जलीय-कृषिक्षेत्रेषु सहयोगं सुदृढ़ीकर्तुं घोषणापत्रं निस्सारितम्। एतस्मिन् घोषणापत्रे इजराइल-देशे समायोजिते द्वितीय-वैश्विक-सुरक्षा-शिखर सम्मेलनावधौ हस्ताक्षराणि कृतानि। मत्स्यपालन-पशुपालन-दुग्धोत्पादन-मन्त्रालयेन विज्ञापितम् यत् घोषणापत्रे कृषि-प्रविधि-क्षमतानुसन्धाने विशेषं बलं दलम्।

कनिष्ठ-19

कनिष्ठवर्गे पुरुषाणां विंशतिः-प्रतिविंशतिः विश्वचषक-द्वन्द्वे गतदिने जिम्बाब्वे-इत्यत्र बुलावेयोस्थिते क्रीडांगणे प्रथमे द्वन्द्वे भारतेन यू.एस.ए. दलं षट्स्तोभपुरस्सरं पराजितम्। प्रथमं दण्डेन क्रीडयता यू.एस.ए.-दलेन सप्ताधिकशतं धावनांकाः एव समर्जिताः। प्रत्युत्तरे, वर्षाकारणेन संशोधितलक्ष्यं भारताय प्रदत्तम्। षण्णवति-धावनांकानां लक्ष्यस्य प्रत्युत्तरे भारतीयदलेन द्वन्द्वं एतत् विजितम्।